स्तोभलक्षणादिकं गानशब्दे २५७३ पृ० दृश्यम्। तच्च लक्षणं वर्णमात्रस्तोभस्य। वाक्यस्तोभस्य तु नव विधाः भवन्ति तदुक्तं "आशास्तिः स्तुतिसंख्याने प्रणवः परिदेवनम्। प्रैषमन्वेषणञ्चैव सृष्टिराख्यानमेव च" एते तु वाक्यस्तोभाः पदस्तोभास्तु पञ्चदश मानग्रन्थेषु दर्शितास्तत एवावगन्तव्याः।

**स्तोभ** आत्मगुणाविष्करणे अद० चु० उभ० अक० सेट्। स्तोभयति—ते अतुस्तोभत्—त। बहुचकत्वात् न षोपदेशः।

**स्तोम** पुं० स्तोम-अच् स्तु-मन् वा। १समूहे अमरः। २यज्ञे हेमच०। ३स्तवे ४स्तुतिभेदे ५मस्तके ६धने ७शस्त्रे ८लौहाग्रदण्डे च न० ९वक्रे त्रि०। "नारायणेन स्तोमेन" यजु० १।५२ "कयं स्तोमान् प्रपच्छ ऋ० १।१४।८

**स्त्यान** न० स्त्यै—भावे क्त तस्य नः। १स्नेहे २घनत्वे ३संहतौ ४आलस्ये ५प्रतिशब्दे च विश्वः। कर्त्तरि क्त। ६संहतिकारके ७ध्वनिकारके च त्रि०।

**स्त्येन** पुं० स्त्यै—इनच्। १चौरे अमृते च उणा०।

**स्त्यै** संहतौ ध्वनौ भ्वा० अक० अनिट्। स्त्यायति अस्त्यासीत् पर्युदासात् षोपदेशः।

**स्त्री** स्त्री स्तु-ड्रट्। योषिति नार्य्याम् अमरः। तद्भेदादिकं रतिम० उक्तं यथा
"पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनी तथा। शशो मृगो वृषोऽश्वश्च स्त्रीपुंसोर्जातिलक्षणम्। भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा अविरलकुचयुग्मा चारुकेशी कृशाङ्गी। मृदुवचनसुशीला गीतवाद्यानुरक्ता सकलतनुसुवेशा पद्मिनी१पद्मगन्धा। भवति रतिरसज्ञा नातिखर्वा न दीर्घा तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी। घनकठिनकुचाढ्या सुन्दरी बद्धशीला सकलगुणसमेता चित्रिणी२चित्रवक्त्रा। दीर्घातिदीर्घनयना वरसुन्दरी या कामोपभोगरसिका गुणशीलयुक्ता। रेखात्रयेण च विभूषितकण्ठदेशा सम्भोगकेलिरसिका किल शङ्खिनी३ सा। स्थूलाधरा स्थूलनितम्बभागा स्थूलाङ्गुली स्थूलकुचा सुशीला। कामोत्सुका गाढरतिप्रिया या नितम्बखर्वा करिणी४मता सा। शशके पद्मिनी तुष्टा चित्रिणी रमते मृगे। वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हये। पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी। शङ्खिनी क्षारगन्धा च मदगन्धा च हस्तिनी। बाला च तरुणी प्रौढा वृद्धा भवति नायिका। गुणयोगेन रन्तव्या नारी वश्या भवेत् तदा। आ षोडशाद् भवेद् बाला तरुणी त्रिंशका मता। पञ्चपञ्चाशका प्रौढा भवेद्वृद्धा ततः परम्। फलमूलादिभिर्बाला तरुणी रतियोगतः। प्रेमदानादिभिः प्रौढा वृद्धा च दृढताडनात्। बाला तु प्राणदा प्रोक्ता तरुणी प्राणहारिणी। प्रौढा करोति वृद्धत्वं वृद्धा मरणमादिशेत्। अङ्गुष्ठे चरणे च गुल्फनिलये जानुद्वये वस्तिके नाभौ वक्षसि जङ्घयोर्निगदिता कण्ठे कपोलेऽधरे। नेत्रे कर्णयुगे ललाटफलके मौलौ च वामभ्रुवामूर्द्धादिचलनक्रमेण कथिता चान्द्री कला पक्षयोः। सीमन्ते नयनेऽधरे च गलके वक्षस्थले चूचुके नाभौ श्रोणितटे मनोभवगृहे जङ्घातटे गण्डके। गुल्फे पादतले तदङ्गुलितटेऽङ्गुष्ठे च तिष्ठत्यसौ वृद्धिक्षीणतया समं शशिकला पक्षद्वयोर्योषिताम्। शुक्लपक्षे वसेद्वामे पादाङ्गुलिकनिष्ठके। शुक्लप्रतिपदादौ च कृष्णे चाधः प्रलम्बते। पुंसः सव्ये स्त्रियोऽवामे शुक्ले, कृष्णे विपर्य्ययः। एतानि कामस्थानानि ज्ञेयानि नागरैः सदा। बलयुक्ता यदा नारी विपरीतरतिर्भवेत्। सञ्चाल्य तु कलास्थानं रन्तव्या कामिनी तदा। नेत्रे कक्षे कपोले च हृदि पार्श्वद्वयेऽपि च। ग्रीवायां नाभिदेशे च कामी चुम्बति कामिनीम्। मुखे जङ्घे नितम्बे च जघने मदनालये। स्तनयुग्मे सदा प्रीतः कामी चुम्बति कामिनीम्। प्रेम्णा स्त्रियं समालिङ्ग्य शीत्कारं मुखचुम्बनम्। कण्ठासक्तं पुनः कृत्वा गाढालिङ्गनमाचरेत्। विधृत्य हस्तौ जघनोपविष्टः शीत्कृत्य वक्त्रे च मुदा प्रचुम्ब्य। भगे च लिङ्गं स्तनमर्दनञ्च दत्त्वापि कृत्वा प्ररमेच्च कामी। केतक्यग्रनखं कृत्वा नखांस्त्रीन् पञ्च चैव वा। पृष्ठे च जघने योनौ दत्त्वा कामी रमेत् स्त्रियम्। नखरोमाङ्कितं कृत्वा दन्तेनाधरपीडनम्। ग्रीवामाकृष्य यत्नेन योनौ लिङ्गेन ताडनम्। लिङ्गप्रवेशनं कृत्वा धृत्वा गाढप्रयोगतः। पार्श्वद्वयेन सम्पीड्य निष्ठुरं ताडयेद्भगम्। समालिङ्ग्य स्त्रियं गाढं स्तनयुग्मे च मर्दनम्। योनौ नाभौ च संमर्द्य निष्ठुरं लिङ्गताडनम्। केशं करेण संगृह्य दृढं सन्ताडयेद्भगम्। वदने चुम्बनं कृत्वा भगं हस्तेन मर्दयेत्। कुचं करेण संमर्द्य पीडयेदधरं दृढम्। रवेन पद्मगन्धेन पद्मिनीरतिमादिशेत्। शीत्कारं चुम्बनं पीडा गले हस्तौ च चुम्बनम्। स्तने चाक्षे स्तने हस्तौ चित्रिणीरति-